**Series : SMA/1**

कोड नं.
Code No. **22/1**

रोल नं.
Roll No.

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **12** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **16** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जायेगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains **12** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **16** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer script during this period.

# संस्कृतम् (केन्द्रिकम्)
# SANSKRIT (Core)

*अवधि : 3 होरात्रयम्]* *[ पूर्णाङ्का : 100*
*Time allowed : 3 hours]* *[Maximum marks : 100*

***निर्देशाः :***

*सङ्केताभावे सर्वेषां प्रश्नानामुत्तराणि संस्कृतेनैव लेखनीयानि ।*
*जहाँ स्पष्ट संकेत नहीं हैं, वहाँ उत्तर संस्कृत में ही दीजिए ।*
*Answer the questions in Sanskrit only unless stated otherwise.*

*उत्तराणि पृथक् दत्तायाम् उत्तरपुस्तिकायाम् एव लेखनीयानि ।*
*सभी उत्तर अलग दी गई उत्तर-पुस्तिका में लिखें ।*
*Answers should be written only in the separate answer-book provided.*

*अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।*
*इस प्रश्नपत्र में **चार** खण्ड हैं ।*
*There are **four** sections in this question paper.*

| | | | |
|---|---|---|---|
| खण्डः क<br>Section A | :<br>: | अपठितांश - अवबोधनम् (अपठितांश - अवबोधन )<br>(Unseen Reading Comprehension) | 10 अङ्काः |
| खण्डः ख<br>Section B | :<br>: | संस्कृतेन रचनात्मककार्यम् (संस्कृत रचनात्मक कार्य)<br>(Sanskrit Writing Skills) | 15 अङ्काः |
| खण्डः ग<br>Section C | :<br>: | अनुप्रयुक्तव्याकरणम् (अनुप्रयुक्त व्याकरण)<br>(Applied Grammar) | 30 अङ्काः |
| खण्डः घ<br>Section D | :<br>: | भाग I — पठितांश – अवबोधनम् (पठितांश – अवबोधन)<br>PART I — Reading Comprehension | 35 अङ्काः |
| | | भाग II — सामान्यः संस्कृतसाहित्यपरिचयः<br>(सामान्य संस्कृत साहित्य-परिचय)<br>PART II — General Introduction to Sanskrit Literature | 10 अङ्काः |

## खण्डः क (SECTION A) — 10 अङ्काः

### अपठितांश – अवबोधनम्
### अपठितांश – अवबोधन
### Unseen Reading Comprehension

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्त-प्रश्नानाम् उत्तराणि संस्कृतेन लिखत :
निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए :
Read the following passage and answer the given questions in Sanskrit :

विदुषां मतेन सृष्टेः रचना प्रभोः इच्छामात्रेण संजाता । ईश्वरः अकथयत् –, "एकोऽहम् बहु स्याम्" तत एव सृष्टिः सृष्टा । ऋग्वेदे कथ्यते 'प्रारम्भे न अस्तित्वम् आसीत् न वा अनस्तित्वम् ।' सकलः संसारः एकम् अदृश्यम् तेजः आसीत् । वेदे तु इदं कथ्यते यद् अस्याः सृष्टेः उत्पत्तिः, एकेन शून्येन निर्वातेन वा अभवत् । संक्षेपेण ईश्वरस्य कल्पनया एव सृष्टिः अस्तित्वमागता । कल्पनाया अतिमहत्त्वमस्ति, ईश्वरो यत्र काल्पनिकः तत्र मानवः कल्पनाशीलः । कामं काल्पनिकः तथापि परमेश्वरः सर्वेषां सम्बलः अस्ति । कामं स साकारो निराकारो, व्यक्तोऽव्यक्तः आस्तिको वास्यान्नास्तिकः, अस्माकं कल्पनाया ईश्वरः तु अस्ति एव । ये तं स्वीकुर्वन्ति तेषां कृते प्रतिकूलेषु निराशाक्षणेषु वा परिस्थितिषु स एव सम्पूर्णः आश्रयः भवति ।

**प्रश्नाः**

(अ) एकपदेनोत्तरत । $\frac{1}{2} \times 4 = 2$

एक पद में उत्तर दीजिए ।

Answer in one word.

(i) कस्याः रचना प्रभोः इच्छामात्रेण अभवत् ?

(ii) प्रारम्भे कस्या अस्तित्वम् न आसीत् ?

(iii) सर्वेषां सम्बलः कः अस्ति ?

(iv) कस्य कल्पनया सृष्टिः अस्तित्वमागता ?

(ब) पूर्णवाक्येनोत्तरत । $1 \times 2 = 2$

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

(i) ईश्वर: कीदृश: अस्ति ?

(ii) ये तं स्वीकुर्वन्ति तेषां कृते ईश्वर: कीदृश: ?

(स) यथानिर्देशम् उत्तरत । $1 \times 4 = 4$

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'संसार:' इति पदस्य किं विशेषणम् ?

(ii) 'उत्पत्ति:' अस्य पदस्य का क्रिया ?

(iii) 'यद्यपि' अस्य पदस्य क: पर्याय: ?

(iv) 'विनाश:' अस्य विलोमपदं किमत्र प्रयुक्तम् ?

(द) अस्य अनुच्छेदस्य कृते समीचीनं शीर्षकं संस्कृतेन लिखत । 2

इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।

Write a suitable title for this passage in Sanskrit.

## खण्ड: ख (SECTION B) 15 अङ्का:

### संस्कृतेन रचनात्मककार्यम्

### संस्कृत रचनात्मक कार्य

### Sanskrit Writing Skills

2. भवान् अनुराग: । भवन्मित्रं शेखर: स्वनगरमण्डले चित्रकला-प्रतियोगितायां प्रथमं पुरस्कारं लब्धवान् । तं वर्धापयितुं लिखिते पत्रे मञ्जूषापदै: रिक्त-स्थानपूर्तिं कृत्वा पत्रं पुन: लिख । $\frac{1}{2} \times 10 = 5$

आप अनुराग हैं । आपके मित्र शेखर ने अपने ज़िले की चित्रकला प्रतियोगिता में प्रथम पुरस्कार प्राप्त किया है । उसे बधाई देने के लिए लिखे गए पत्र में मंजूषा के पदों से रिक्त स्थान पूर्ति कर पत्र को पुन: लिखिए ।

You are Anuraga. Your friend Shekhar has got first prize in the competition of the art of picture making. Written a letter to congratulate him, fill in the blanks from the words given in the box below and rewrite the same.

दिल्लीनगरस्य,
पूर्वमण्डलम् ।
दिनांक: ................ ।

प्रिय सखे ! (i) _________ ।

सप्रेम नम: । भवान् अस्मिन् वर्षे (ii) _________ चित्रकला-प्रतियोगितायां (iii) _________ मण्डलानि पराजित्य प्रथमं पुरस्कारं (iv) _________ । एतदर्थं मनसि अहं (v) _________ हर्षमनुभवामि भवान् प्रायश: विचारमग्नो (vi) _________ अत एव तव चित्रे ते भावा: समागता: यान् (vii) _________ निर्णायका: तुभ्यं प्रथमं स्थानं दत्तवन्त: । एतस्मिन् विषये तव (viii) _________ अभिवादनार्हौ यौ तव उत्साहं वर्धयितुं सदैव संलग्नौ । (ix) _________ तौ प्रति निवेदय अभिवादनम् । आशासे यद् भवान् अग्रिमवर्षे स्वदेशे प्रतियोगितासु प्रथममेव स्थानं लप्स्यते । तव भगिन्यै शुभाशिष: ।

भवताम्,
(x) _________ सखा,
अनुराग: ।

| मञ्जूषा |
| --- |
| मम, स्वनगरमण्डलेषु, महान्तम्, सर्वाणि, लब्धवान्, भवति, पितरौ, दृष्ट्वा, शेखर ! अभिन्न: । |

3. मञ्जूषा-लिखितपदानां साहाय्येन अधोलिखितायां लघुकथायां रिक्तस्थानानि पूरयित्वा कथां पुनः लिखत :
मञ्जूषा में दिए गए पदों की सहायता से निम्नलिखित लघुकथा में रिक्त स्थानों की पूर्ति कर कथा को पुनः लिखिए : $\frac{1}{2} \times 10 = 5$

Complete the blanks of the following short story, with the help of the words given in the box below and rewrite the same.

एकदा एकः कलाकारः स्वचित्राणां (i) _________ अकरोत् । तां द्रष्टुं नगरस्य (ii) _________ जनाः समागच्छन् । सर्वे मानवाः तां प्रदर्शनीं दृष्टवन्तः । तत्र (iii) _________ एका बाला । सा (iv) _________ अन्ते एकं चित्रं दृष्टवती यत्र मुखं तु केशाच्छन्नम् पादयोः च आस्ताम् (v) _________ । मूले च लिखितम् 'अवसरः' । सकलाः जनाः तु न अजानन् किमपि । बाला तु तं चित्रकारं तद् विषये (vi) _________ । कलाकारः अवदत् एषोऽवसरोऽस्ति । बाला आच्छन्नस्य मुखस्य विषये यदा अपृच्छत् तदा सोऽवदत् – सर्वेषां जीवने अवसरः (vii) _________ आगच्छति परं सामान्याः जनाः तं न (viii) _________ प्रगतिं च न कुर्वन्ति । बाला पुनः तत्पादयोः पक्षविषयेऽपि पृष्टवती – 'कथमेतौ पक्षौ पादयोः ?' कलाकारः अवदत् 'अवसरः' पक्षौ प्रक्षिप्य यदा गच्छति तदा न प्रत्यावर्तते । बाला चित्रस्य रहस्यं (ix) _________ तस्मादेव (x) _________ प्रगतेः अवसरं प्रतीक्षितुं प्रारभत ।

| मञ्जूषा |
|---|
| दिनात्, अपृच्छत्, प्रदर्शनीम्, चित्रस्य, शतशः, पक्षौ, परिचिन्वन्ति, ज्ञात्वा, आगता, प्रदर्शनीवद् । |

4. मञ्जूषायां लिखितपदानां सहायतया **पञ्च**संस्कृतवाक्येषु 'अध्ययनस्य महत्त्वम्' इति विषयम् अधिकृत्य वर्णनं कुरुत ।
मञ्जूषा में लिखित पदों की सहायता से **पाँच** संस्कृत वाक्यों में 'अध्ययनस्य महत्त्वम्' – इस विषय का वर्णन कीजिए । $1 \times 5 = 5$

With the help of the words given in the box describe the अध्ययनस्य महत्त्वम् (Importance of study) in Sanskrit in **five** sentences.

| मञ्जूषा |
|---|
| आजीविका, ज्ञानम्, सज्जनता, विदेशगमनम्, प्राप्यते, लभते, सम्मानम्, राजा, पूज्यते, सर्वत्र, विद्वान्, धनार्जनम्, सत्ता, राज्ये, गृहे, परिवारे । |

## खण्डः ग (SECTION C) — 30 अङ्काः

### अनुप्रयुक्त व्याकरणम्
### अनुप्रयुक्त व्याकरण
### Applied Grammar

5. अधोलिखित-वाक्येषु रेखाङ्कित-पदानां सन्धिच्छेदं कुरुत : $1 \times 6 = 6$
निम्नलिखित वाक्यों में रेखांकित पदों में सन्धिच्छेद कीजिए :
Desjoin Sandhis in the underlined words of the following sentences :
(i) ऋषयो <u>ह्याप्तकामाः</u> ।
(ii) <u>अवलम्बो</u> रोलम्बकदम्बस्य ।
(iii) <u>नान्या</u> तेषां गतिर्भवेत् ।
(iv) असंवृताङ्गान्निशिता <u>इवेषवः</u> ।
(v) <u>गेहेऽन्धकारम्</u> आकण्ठमात्रम् ।
(vi) <u>कच्चिद्</u> जनं निमन्त्रयितुम् इच्छामि ।

6. अधोलिखितवाक्येषु रेखाङ्कितसमस्तपदानां विग्रहाः लेख्याः : **1 × 6 = 6**

निम्नलिखित वाक्यों में रेखांकित समस्त पदों के विग्रह लिखिए :

Expound the underlined words of the following sentences :

(i) अहिंसया च भूतात्मा ।

(ii) अनेन एव कृताः कल्पभेदाः ।

(iii) दुराराध्या हि राजलक्ष्मीः ।

(iv) कुलिशपातोपमं वचः समाकर्ण्य ।

(v) यथाविभवं गृहदैवतानि अर्चयन् ।

(vi) भूमध्यरेखास्थितस्य नरस्य कृते ।

7. अधोलिखितेषु वाक्येषु कोष्ठकान्तर्गतौ प्रकृति-प्रत्ययौ योजयित्वा रिक्तस्थानानि पूरयत :

निम्नलिखित वाक्यों में कोष्ठक के अन्तर्गत प्रकृति के साथ निर्दिष्ट प्रत्यय को जोड़कर रिक्त स्थानों की पूर्ति कीजिए : **1 × 8 = 8**

Fill in the blanks in the following sentences by adding suffixes to the roots and words given in the brackets :

(i) पूर्वस्यां ________ मरीचिमालिनः । (भग + मतुप्)

(ii) कथं कौमुदीमहोत्सवो न ________ । (प्र + आ + रभ् + क्त)

(iii) आर्यं शिरसा ________ विज्ञापयति । (प्र + नम् + क्त्वा)

(iv) अत्र ________ इति निश्चयः । (आ + गम् + तव्यत्)

(v) सर्वे छात्राः ________ उत्सुकाः । (दृश् + तुमुन्)

(vi) ________ यद्यस्ति किं पातकैः ? (पिशुन + तल्)

(vii) ________ अयम् दरिद्रभावः । (रम् + अनीयर्)

(viii) ________ च न परिभ्रष्टम् । (सत् + त्व)

8. अधोलिखितेषु वाक्येषु कर्तृक्रिया-पदयोः अन्वितिः क्रियताम् : **1 × 5 = 5**

निम्नलिखित वाक्यों में कर्ता एवं क्रियापदों की अन्विति कीजिए :

Write the suitable verb according to the subject in the following sentences :

(i) अहम् नष्टां श्रियम् न ________ । (अनुशोचामः/अनुशोचामि)

(ii) शठाः तथाविधान् ________ । (हतः/घ्नन्ति)

(iii) भव्यता प्रेक्षकान् प्रसभम् ________ । (आकर्षतः/आकर्षति)

(iv) मत्स्यजीविनः मत्स्यसंक्षयं ________ । (करिष्यतः/करिष्यन्ति)

(v) चाणक्यः स्वप्नेऽपि ________ । (चेष्टन्ते, चेष्टते)

**अथवा / OR**

अधोलिखितवाक्येषु विशेष्यैः सह मञ्जूषाया विशेषणपदानि योजयत : 1 × 5 = 5

निम्नलिखित वाक्यों में विशेष्यों के साथ मञ्जूषा से विशेषण पदों को जोड़िए :

Add the appropriate adjectives from the box, with their qualifying nouns in the following sentences :

(i) गम्यतां किञ्चित् _______ सरः ।

(ii) अथ _______ प्रयोजनं श्रोतुमिच्छामि ।

(iii) एष एवाङ्गीकरोति _______ अयनम् ।

(iv) यस्तु _______ भूतान्यात्मन्येवानुपश्यति ।

(v) _______ चिन्ताङ्कुराः प्रादुर्भवन्ति ।

| मञ्जूषा |
| --- |
| सर्वाणि, नानाविधाः, उत्तरम्, निकटम्, अपरम् । |

9. अधोलिखितेषु वाक्येषु कोष्ठकप्रदत्तशब्दैः सह उपयुक्तां विभक्तिं प्रयुज्य रिक्तस्थानानि पूरयत :
निम्नलिखित वाक्यों में कोष्ठक में दिए गए शब्दों के साथ उपयुक्त विभक्ति का प्रयोग कर रिक्त स्थानों की पूर्ति कीजिए : 1 × 5 = 5

Fill in the blanks using appropriate case endings (विभक्ति) with the words given in the brackets in the following sentences :

(i) _______ सुवर्णशतसहस्राणि दापय । (वैतालिक) ।

(ii) अस्मिन् समये किम् _______ (कौमुदीमहोत्सव) ।

(iii) _______ कर्तव्यं प्रपलायनम् । (अशक्त)

(iv) मानवः _______ एव उत्सवप्रियः । (स्वभाव)

(v) सत्यं चेत् _______ किम् ? (तपस्)

## खण्डः घ (SECTION D) — 35 अङ्काः

### भाग – I

### PART – I

### पठितांश – अवबोधनम्

### पठितांश – अवबोधन

### Reading Comprehension

10. अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित गद्यांश, पद्य तथा नाट्यांश को पढ़कर उन पर आधारित प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following prose, poetry and drama passage and answer the questions based on them in Sanskrit :

(क) **गद्यांशः**

वत्स ! श्रूयताम् अवधार्यताम् च । पितृवधात् क्रुद्धः राक्षसोपदेशप्रवणः महीयसा म्लेच्छबलेन परिवृतः पर्वतक-पुत्रः मलयकेतुः अस्मान् अभियोक्तुम् उद्यतः । सोऽयं व्यायामकालो न उत्सवकालः इति । अतः इदानीं दुर्गसंस्कारः प्रारब्धव्यः । अस्मिन् समये किं कौमुदीमहोत्सवेन ? इति प्रतिषिद्धः । राष्ट्रचिन्ता ननु गरीयसी । प्रथमं राष्ट्रसंरक्षणम् ततः उत्सवाः इति ।

**प्रश्ना** :

(अ) एकपदेनोत्तरत । $\frac{1}{2} \times 2 = 1$

एक पद में उत्तर दीजिए ।

Answer in one word.

(i) क: अभियोक्तुम् उद्यत: ?

(ii) इदानीं क: प्रारब्धव्य: ?

(ब) पूर्णवाक्येनोत्तरत । 1

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

का गरीयसी, प्रथमं किम्, तत: किम् ?

(स) यथानिर्देशमुत्तरत ।

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'म्लेच्छबलेन' अस्य किं विशेषणम् ? $\frac{1}{2}$

(ii) 'लघीयसी' अस्य विलोमपदं किम् ? $\frac{1}{2}$

(iii) 'अस्मान्' इति सर्वनामपदं केभ्य: प्रयुक्तम् ? 1

(iv) 'उद्यत:' अस्या: क्रियाया: कर्तृपदं किम् ? 1

(ख) **पद्यम्** :

शिक्षा क्षयं गच्छति कालपर्यया –
त्सुबद्धमूला निपतन्ति पादपा: ।
जलं जलस्थानगतं च शुष्यति
हुतं च दत्तं च तथैव तिष्ठति ।।

**प्रश्ना**:

(अ) एकपदेनोत्तरत । $\frac{1}{2} \times 2 = 1$

एक पद में उत्तर दीजिए ।

Answer in one word.

(i) का क्षयं गच्छति ?

(ii) के निपतन्ति ?

(ब) पूर्णवाक्येनोत्तरत । 1

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

किं किं तथैव तिष्ठति ?

(स) यथानिर्देशमुत्तरत ।

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'पादपा:' अस्य विशेषणं किम् ? $\frac{1}{2}$

(ii) 'उत्पत्तिम्' अस्य विलोमपदं किम् ? $\frac{1}{2}$

(iii) 'निपतन्ति' क्रियाया: कर्तृपदं किम् ? 1

(iv) 'वृक्षा:' अस्य क: पर्याय: ? 1

(ग) **नाट्यांश** :

सूत्रधार: : आर्ये ! किम् अस्त्यस्माकं गृहे कोऽपि प्रातराश: ?

नटी : अस्ति, घृतं गुडो दधि तण्डुलाश्च सर्वमस्ति ।

सूत्रधार: : चिरं जीव ! एवं शोभनानां भोजनानां दात्री भव ।
आर्ये ! किमेतत् सर्वम् अस्माकं गेहेऽस्ति ?

नटी : नहि नहि ! अन्तरापणे ।

सूत्रधार: : (सरोषम्) आ: अनार्ये एवं ते आशा छिद्यताम् ।
अहं पर्वताद् दूरमारोप्य पातितोऽस्मि ।

नटी : मा बिभीहि । मा बिभीहि । मुहूर्त्तकं प्रतिपालयतु आर्य: । सर्वं सज्जं भविष्यति । आर्य ! अद्य ममोपवास: अस्ति । यदि आर्यस्यानुग्रह: स्यात्तर्हि अस्मादृशयोग्यं जनं निमन्त्रयितुम् इच्छामि ।

सूत्रधार: : कुत्र नु खलु दरिद्रं योग्यं जनं लभेय ।

**प्रश्ना:**

(अ) एकपदेनोत्तरत । $\frac{1}{2} \times 2 = 1$

एक पद में उत्तर दीजिए ।

Answer in one word.

(i) का शोभनानां भोजनानां दात्री भवतु ?

(ii) क: पर्वताद् दूरमारोप्य पातित: ?

(ब) पूर्णवाक्यनोत्तरत । 1

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

कस्य अनुग्रहेण का स्वयोग्यं जनं निमन्त्रयितुम् इच्छति ?

(स) यथानिर्देशमुत्तरत ।

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'अस्मि' इति क्रियाया: कर्तृपदं किम् ? $\frac{1}{2}$

(ii) 'भोजनानाम्' अस्य पदस्य विशेषणं किम् ? $\frac{1}{2}$

(iii) 'धनिकम्' अस्य विलोमपदं किम् ? 1

(iv) 'कृपा' अस्य पदस्य क: पर्याय: ? 1

11. यथानिर्देशं प्रश्नौ उत्तरत । **2 + 2 = 4**

यथानिर्देश दोनों प्रश्नों के उत्तर दीजिए ।

Answer both of the questions as directed.

(i) 'सूर्य: एव प्रकृते: आधार:' इति पाठ: कस्माद् ग्रन्थात् सङ्कलित: ?

(ii) 'अहो । श्रुतं भवद्भि: यद् मत्स्यजीविभि: अभिहितम् ।' इति क: कान् कथयति ?

12. प्रत्येकम् अंशस्य प्रदत्तभावार्थ**त्रयात्** शुद्धं भावार्थं चित्वा लिखत । **2 + 2 = 4**

प्रत्येक अंश के दिए गए **तीन** भावार्थों में से शुद्ध भावार्थ चुनकर लिखिए ।

Pick out and write the correct one out of the **three** explanations given each of the following lines.

(अ) एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम् ।

**भावार्था:**

(i) सूर्य: यदा कदा कामपि दिशं गच्छति ।

(ii) सूर्य: षट् मासान् उत्तरं, षट् मासान् च दक्षिणां दिशाम् आश्रयति ।

(iii) सूर्य: एकदा उत्तरे प्रकाशं यच्छति, एकदा दक्षिणे ।

(ब) न निष्प्रयोजनं प्रभुभि: आहूयन्ते अधिकारिण: ।

**भावार्था:**

(i) राजान: स्वस्वविभागाध्यक्षान् विशेषकार्याय एव आह्वयन्ति ।

(ii) अधिकारिण: स्वयं राजानं न पश्यन्ति ।

(iii) अधिकारिण: स्वयमेव समये समये राजानम् उपसर्पन्ति ।

**अथवा / OR**

अधोलिखितस्य पद्यस्य प्रदत्तं भावार्थं मञ्जूषापदै: पूरयित्वा पुन: लिखत : **1 × 4 = 4**

निम्नलिखित पद्य के दिए गए भावार्थ को मञ्जूषा में दिए गए पदों से पूर्ण कर पुन: लिखिए :

Complete the central idea of the given verse with the words given in the box below and rewrite the same.

वदनं प्रसादसदनं सदयं हृदयं सुधामुचो वाच: ।

करणं परोपकरणं येषां केषां न ते वन्द्या: ।।

**भावार्थ:**

ये जना: सदैव (i) ______ भवन्ति, येषां हृदये सदैव (ii) ______ ये सदैव अमृतसमां (iii) ______ वदन्ति, ते जना: कै: प्रणम्या: न भवन्ति, अपि तु (iv) ______ एव ।

| मञ्जूषा |
|---|
| करुणा, वाणीम्, प्रसन्नवदना:, सर्वै: । |

13. अधोलिखितस्य श्लोकद्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा अन्वयं पुनः लिखत : $\frac{1}{2} \times 8 = 4$

निम्नलिखित **दो** श्लोकों के दिए गए अन्वयों में रिक्त स्थानों की पूर्ति कर पुनः लिखिए :

The prose order renderings of the following **two** verses have been given below. Fill in the blanks and rewrite the same :

(i) स किंसखा साधु न शास्ति योऽधिपं,

हितान्न यः संशृणुते स किंप्रभुः ।

सदाऽनुकूलेषु हि कुर्वते रतिं

नृपेष्वमात्येषु च सर्वसम्पदः ।।

**अन्वयः**

यः अधिपम् (i) _______ न शस्ति स किंसखा । यः (ii) _______ न संशृणुते स किंप्रभुः । नृपेषु (iii) _______ च अनुकूलेषु हि (iv) _______ सदा रतिम् कुर्वते ।

(ii) निर्वैरा विमुखीभवन्ति सुहृदः

स्फीता भवन्त्यापदः ।

पापं कर्म च यत् परैरपि

कृतं तत्तस्य सम्भाव्यते ।।

**अन्वयः**

निर्वैराः (i) _______ विमुखीभवन्ति (ii) _______ स्फीताः भवन्ति । यत् (iii) _______ कर्म परैः अपि कृतम् तत् (iv) _______ सम्भाव्यते ।

14. अधोलिखितानां 'क' स्तम्भस्य वाक्यांशानां 'ख' स्तम्भस्य वाक्यांशैः सह सार्थकं सम्मेलनं कृत्वा वाक्यानि पुनः लिखत : $1 \times 4 = 4$

निम्नलिखित 'क' स्तम्भ के वाक्यांशों का 'ख' स्तम्भ के वाक्यांशों के साथ सार्थक मिलान कर वाक्यों को पुनः लिखिए :

Match the sentences of column 'क' with the suitable sentences of column 'ख' and rewrite the same :

| (क) | (ख) |
|---|---|
| (i) किं वाङ्मात्रेणापि | (i) क्षणमप्यत्र अवस्थातुम् । |
| (ii) तन्न युक्तं साम्प्रतं | (ii) कर्त्तव्यं प्रपलायनम् । |
| (iii) तद्रात्रावपि गम्यतां | (iii) पितृपैतामहिकम् एतत् सरः त्यक्तुं युज्यते । |
| (iv) अशक्तैर्बलिनः शत्रोः | (iv) किञ्चित् निकटं सरः । |

15. अधोलिखितेषु वाक्येषु रेखाङ्किकतशब्दानां प्रसङ्गानुसारं सार्थकम् अर्थं चित्वा लिखत : $1 \times 4 = 4$

निम्नलिखित वाक्यों में रेखाङ्किकत शब्दों के प्रसङ्गानुसार सार्थक अर्थ चुनकर लिखिए :

Select and write the appropriate meanings of the underlined words according to the reference to the context :

(अ) किरणेषु <u>अङ्कः</u> इव ।

(i) चिह्नम्

(ii) कलङ्कः

(iii) क्रोड़: ।

(ब) सत्यस्य परं <u>निधानम्</u> ।

(i) स्थानम्

(ii) आश्रयः

(iii) कोषः ।

(स) <u>विस्मय</u>कराः

(i) स्नेहः

(ii) आश्चर्यः

(iii) त्रुटिः ।

(द) नेपथ्ये <u>वैतालिकौ</u> काव्यपाठं कुरुतः ।

(i) चारणौ

(ii) दासौ

(iii) अधिकारिणौ ।

## खण्डः घ (SECTION D) 10 अङ्काः

### भाग – II

### PART – II

### सामान्यः संस्कृत साहित्य परिचयः

### सामान्य संस्कृत साहित्य परिचय

### General Introduction to Sanskrit Literature

16. (अ) अधोलिखितानां कवीनां देशकालकृतीनां यथानिर्देशं नामानि लिखत : $5 + 5 = 10$

निम्नलिखित कवियों के देश, काल एवं कृतियों का निर्देशानुसार नाम लिखिए :

Write about the place, date and works of the following poets as directed :

**कवयः**

(अ) (i) चरकः,

(ii) अम्बिकादत्तव्यासः,

(iii) मनुः ।

} देशः $\frac{1}{2} \times 3 = 1\frac{1}{2}$

(ब) (i) भर्तृहरि:,
(ii) भास:
(iii) वराहमिहिर: ।
} स्थानम् $\frac{1}{2} \times 3 = 1\frac{1}{2}$

(स) (i) भारवि:
(ii) भवभूति:
(iii) सुश्रुत:,
(iv) विशाखदत्त: ।
} कृति: $\frac{1}{2} \times 4 = 2$

**अथवा / OR**

अधोलिखितवाक्येषु मञ्जूषापदै: रिक्तस्थानपूर्तिं कुरुत : $\frac{1}{2} \times 10 = 5$

निम्नलिखित वाक्यों में मंजूषा के पदों से रिक्तस्थान पूर्ति कीजिए :

Fill in the blanks with the help of the words given in the box in the following sentences.

(i) कालिदास: ______ गीतिकाव्ये अलिखत् ।

(ii) स्वप्नवासवदत्तम् ______ रचितमस्ति ।

(iii) नाटके ______ सन्धय: भवन्ति ।

(iv) मुद्राराक्षसे ______ नास्ति ।

(v) पद्यं ______ भवति ।

(vi) आख्यायिकायाम् ______ वृत्तं भवति ।

(vii) खण्डकाव्ये अधिकतमा: ______ सर्गा: भवन्ति ।

(viii) नाटकस्य प्रारम्भे ______ भवति ।

(ix) भरतवाक्यम् ______ अन्ते भवति ।

(x) ______ गद्यपद्यमयं भवति ।

| मञ्जूषा |
|---|
| नाटकस्य, चम्पू:, छन्दोयुक्तम्, द्वे, भासेन, पञ्च, विदूषक:, ऐतिहासिकम्, नान्दी, अष्ट । |

(ब) संस्कृतगीतिकाव्यस्य **पञ्च** विशेषता: संस्कृतेन लिखत । 5

संस्कृत गीतिकाव्य की **पाँच** विशेषताओं को संस्कृत में लिखिए ।

Write **five** characteristics of Sanksrit lyric poetry in Sanskrit.

---